"इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥") तत्पर्य्यायः । श्रेयान् २ पुष्कलः ३ सत्तमः ४ अतिशोभनः ५ । इत्यमरः ॥ मुख्यः ६ वरेण्यः ७ प्रमुखः ८ अग्र्यः ९ अग्रहरः १० उत्तमः ११ प्रग्रहः १२ अनुत्तमः १३ अग्रीयः १४ प्रवेकः १५ अग्रः १६ अग्रियः १७ । इति शब्दरत्नावली ॥ अनवरः १८ अग्रिमः १९ प्राग्र्यः २० प्राग्रहरः २१ प्रवर्हः २२ । इति जटाधरः ॥ वृद्धः । ज्येष्ठः । इति शब्दरत्नावली ॥

श्रेष्ठकाष्ठः, पुं, श्रेष्ठं काष्ठमस्य ।) शाकवृक्षः । इति राजनिर्घण्टः ॥

श्रेष्ठा, स्त्री, (इयमासामतिशयेन प्रशस्या । इष्ठन् । टाप् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ मेदा । इति केचित् ॥ उत्तमा नारी च ॥

श्रेष्ठाम्लं, क्ली, (श्रेष्ठं अम्लम् ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥

श्रेष्ठाश्रमः, पुं, (श्रेष्ठ आश्रमः ।) गृहस्थाश्रमः । आश्रमत्रयाणां पालकत्वात् ॥

श्रेष्ठी, [न्] पुं, (श्रेष्ठं धनादिकमस्त्यस्येति । इनिः ।) कुलोत्तमशिल्पी । यथा,—

"कुलीकस्तु कुलीश्रेष्ठी कुलश्रेष्ठिनि शिल्पिनाम् ॥"

इति जटाधरः ॥

(यथा, बृहत्संहितायाम् । २९ । १० ।

"श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः ॥")

श्रै, स्वेदे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) श्रायति रौद्रात्लोकः । इति दुर्गादासः ॥

श्रै म पचने । इति कल्पद्रुमः ॥ भ्वा०-पर०-सक०-अनिट् ।) म, श्रपयति । इति दुर्गादासः ॥

श्रोण, ऋ संघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ अशुश्रोणत् । संघातो राशीकरणम् । इति दुर्गादासः ॥

श्रोणः, पुं, (श्रोणतीति । श्रोण संघाते + अच् । यद्वा शृणोतीति । श्रु श्रवणे बाहुलकात् नः । इत्युणादिटीकायां उज्ज्वलदत्तः । ३।६।) पङ्गुः । इत्यमरः ॥

श्रोणा, स्त्री, (श्रोणसंघाते + अच् ।) श्रवणानक्षत्रम् । (यथा, भागवते । ८ । १८ । ५ ।

"श्रोणायां श्रवणद्वादश्यां मुहूर्त्तेऽभिजिति प्रभुः सर्व्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ॥") काञ्जिकम् । पक्के, त्रि । इति केचित् ॥

श्रोणिः, स्त्री, (श्रोण संघाते + इन् । यद्वा, श्रु श्रवणे + "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।" उणा० ४ । ५१ । इति निः ।) कटिः । इत्यमरः ॥ (यथा, बृहत्संहितायाम् । ५६ । ७ ।

"फुल्लतोरद्रुमोत्तंसाः सङ्गमश्रोणिमण्डलाः । पुलिनाभ्युन्नतोरस्या हंसहासाश्च निम्नगाः ॥") सा तु गर्भस्थस्य मासद्वयेन भवति । इति सुखबोधः ॥ पन्थाः । इति शब्दरत्नावली ॥

श्रोणिफलं, क्ली, (श्रोणिः फलं फलकमिव ।) कटिः इति राजनिर्घण्टः ॥

श्रोणिफलकं, क्ली, (श्रोणिफल + स्वार्थे कन् ।) कटिपार्श्वः । तत्पर्य्यायः । कटः २ । इत्यमरः ॥ फलकं चर्म्म तदाकारत्वात् श्रोणिः फलकमिव श्रोणिफलकम् । कथ्यते आव्रियते कटः कटे वर्षावरणयोः अल् । कटिः । इति केचित् । इति भरतः ॥

श्रोणिबिम्बं, क्ली, कटिसूत्रम् । इति धनञ्जयः ॥

श्रोणिसूत्रं, क्ली, (श्रोणिस्थितं सूत्रम ।) खड्गबन्धनसूत्रम् । परतला इति हिन्दीभाषा ॥ कटिबन्धनसूत्रम् । इति केचित् ॥ घुनुषी इति भाषा ॥

श्रोणी, स्त्री, (श्रोणि + वा ङीष् ।) कटिः । पन्थाः । इति भरतद्विरूपकोषः ॥

श्रोतः, [स्] क्ली, (श्रु + असुन् । तुट् च ।) कर्णः । नदीवेगः । इति जटाधरः ॥ इन्द्रियम् । यथा,

"हृषीकमक्षं करणं श्रोतः खं विषयीन्द्रियम् ॥"

इति हेमचन्द्रः ॥

श्रोतव्यं, त्रि, (श्रु + तव्य ।) श्रवणीयम् । यथा,

"अध्येतव्यं न चान्येन ब्राह्मणं क्षत्त्रियं विना । श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन ॥"

इति तिथ्यादितत्त्वम् ॥

श्रोता, [ऋ] त्रि, (शृणोतीति । श्रु + तृच् ।) श्रवणकर्त्ता । यथा,—

"अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥"

इति हितोपदेशः ॥

पुराणश्रोतृत्वे प्रमाणमाह ।

"पठेदर्थं बुध्यमानः श्रावयेद्वै नरोत्तमे । श्रोता तु प्राङ्मुखो भूत्वा शृणुयात् भक्तितत्परः ॥"

इति पाद्मे पातालखण्डे ७१ अध्यायः ॥

श्रोत्रं, क्ली, (श्रूयतेऽनेनेति । श्रु + "हुयामाश्रुभसिभ्यस्त्रन् ।" उणा० ५ । १६७ । इति त्रन् ।) कर्णम् । इत्यमरः ॥ (यथा, रघुः । ७ । १६ ।

"इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन् कथाः श्रोत्रसुखाः कुमारः ॥")

श्रोत्रियता । इति त्रिकाण्डशेषः ॥

श्रोत्रियः, पुं, (छन्दोऽधीते इति । छन्दस् + "श्रोत्रियंश्छन्दोऽधीते ।" ५ । २ । ८४ । इति घन्प्रत्ययेन साधुः ।) वेदाध्येतृब्राह्मणः । तत्पर्य्यायः । छान्दसः २ । इत्यमरः ॥ श्रूयते धर्म्माधर्म्मावनेन इति श्रोत्रो वेदः तमस्मिन्निति त्रः श्रोत्रं वेत्ति अधीते वा श्रोत्रियः ढघे कादिति इयः । छन्दोऽधीते इत्यर्थे इति छन्दःशब्दस्य श्रोत्रादेशः । इति परे । छन्दो वेत्ति अधीते वा छान्दसः । इति पूर्व्वेण ष्णः । इति भरतः ॥*॥ तस्य लक्षणं यथा,—

"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरेव हि ॥"

इति पाद्मे उत्तरखण्डे ११६ अध्यायः ॥

मानवे मार्कण्डेयपुराणे चाप्येवम् ॥*॥ अपि च ।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित् ॥"

इति दानकमलाकरः ॥

श्रोत्रियता, स्त्री, (श्रोत्रियस्य भावः । श्रोत्रिय + तल् ।) श्रोत्रियधर्म्मः । तत्पर्य्यायः । श्रोत्रम् २ । इति त्रिकाण्डशेषः ॥

श्रौतं, क्ली, (श्रुतौ भवम् । श्रुति + अण् ।) गार्हपत्याहवनीयदक्षिणाग्नयः । यथा,—

"त्रयो ये गार्हपत्याहवनीयदक्षिणाग्नयः । इदमग्नित्रिकं श्रौतं त्रेताग्निहोत्रमित्यपि ॥"

इति जटाधरः ॥

श्रौतः, त्रि, (श्रुतौ भवः । श्रुति + अण् ।) श्रुतिविहितधर्म्मादिः । यथा,—

"धर्म्मज्ञैर्विहितो धर्म्मः श्रौतः स्मार्त्तो द्विधा द्विजैः दानाग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम् ॥ स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः । पूर्व्वेभ्यो वेदयित्वेह श्रौतं सप्तर्षयोऽब्रुवन् ॥ ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि सा श्रुतिः मन्वन्तरस्यातीतस्य स्मृत्वा तन्मनुरब्रवीत् ॥ ततः स्मार्त्तः स्मृतो धर्म्मो वर्णाश्रमविभागशः । एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते ॥ इज्यावेदात्मकः श्रौतः स्मार्त्तो वर्णाश्रमात्मकः ॥"

इति मात्स्ये १२० अध्यायः ॥

अपि च । अधिकरणमालाकृन्माधवाचार्य्यधृतपराशरभाष्ये शातातपः ।

"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत् अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥"

इति तिथ्यादितत्त्वम् ॥

श्रौत्रं, क्ली, श्रोत्रमेव । प्रज्ञादित्वादण् ।) कर्णः । (श्रोत्रियस्य भावः कर्म्म वा । "हायनान्तयुवादिभ्योऽण् ।" ५ । १ । १३० । इत्यण् । "श्रोत्रियस्य यलोपश्च वाच्यः ।" इति यलोपः ।) श्रोत्रियकर्म्म । तत्पर्य्यायः । श्रौत्रियता २ । इति शब्दरत्नावली ॥ (श्रोत्रस्य भावः कर्म्म वा । अण् ।) श्रोत्रकर्म्म च ॥ (श्रोत्राणां समूहः "भिक्षादिभ्योऽण् ।" ४।२।३८ । इति अण् ॥)

श्रौषट्, अव्य, देवहविर्दानम् । इत्यमरः । देवहविर्दानं इत्यनेनायं मन्त्रः सूचितः । इति भरतमतम् ॥

श्र्याह्वं, क्ली, श्रिय आह्वा आख्या यस्य ।) पद्मम् । इति केचित् ॥

श्लकि, इ ङ सर्पे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीयवर्णयुक्तादिः । इ, श्लङ्क्यते । ङ, श्लङ्कते । सर्पो गतिः इति दुर्गादासः ॥

श्लक्ष्णं, त्रि, (श्लिष आलिङ्गने + "श्लिषेरच्चोपधायाः ।" उणा० ३ । १९ । इति क्स्नः अकारश्चोपधायाः ।) अल्पम् । इत्यमरः ॥ मनोहरम् । इत्युणादिकोषः ॥ (यथा, मनुः । २ । १५९ ।

"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ॥")